कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्री

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीरामायनमः
प्रयोगमिच्छताज्ञातुंज्ञेयंकारकमादितः॥संज्ञा[illegible]:
षड्विधाभेदाःस्त्रयोविंशतिधापुनः॥तत्रपंचविधः
कर्ताकर्मसप्तविधंभवेत्॥करणंद्विविधंचैवसं
प्रदानंत्रिधामतं॥२॥अपादानंद्विधाचैवतथा
धारश्चतुर्विधः॥करोतिकारकंसर्वतस्यात
विवक्षया॥३॥तत्रकर्तर्यभिहितेप्रथमैवाभि
धीयते॥तृतीयावाथवाषष्ठीस्यात्तानभिहि
तेद्विधा॥४॥तथाकर्मण्यभिहितेविभक्ति
विधिपूर्वका॥अनुक्तेप्रथमाहित्वापंचमीसप्तमीतथा॥५

यो

१

Acc No. ~~239~~ M 865
Title - व्याकरण (प्रयोगकारकादि)
Sub. - व्याकरण
Author -
Date -
Folios. - 54

K K S U LIBRARY
RAMTEK
441 106
M-865
Dist Nagpur

Checked 2012

स्तृतियापंचमीचैवषाष्ठीचकरणोत्रिधा॥षष्ठिचतु
र्थितृतियाच्च संप्रदानेतथात्रिधा॥६॥पंचमिस्त्वप
पादानेवर्ततेनतथान्यथा॥सप्तम्येवाधिकरणेका
॥१॥ रकस्यैवसंग्रहः॥समासस्तद्धितास्तद्वृत्तेश्च ॥१॥
त्वारोभिधायकाः॥८॥षट्समासाश्चसंक्षेपा
दृष्टाविंशतिधापुनः॥नित्यानित्यचयोगेनलु
गलुक्चेनचद्विधा॥९॥तत्रापिधोतपुरुषः स
प्तधा॥कर्मधारयः॥सप्तधाचबहुव्रीहिर्द्वि
गुणाभा[illegible]षितोद्विधा॥१०॥द्वंद्वाश्चतुर्विध[illegible]से
[illegible]संवंपादवेन्नविधायका॥१८॥+५
५+ नत्पन्नविसंवं[illegible]

योम्यई भावो द्विधामतः ॥ तेषां पुनः समासानां प्रा
धान्यं स्याच्चतुर्विध्यं ॥ ११ ॥ सामान्यप्रययाभावा
ख्यं त्रिवि[illegible]ध्यस्तद्धितो मतः ॥ पदानांतु समर्थी
नां प्रथमादप्रसूयते ॥ १२ ॥ तिङां च नव पूर्वार्द्धला
दशावपरौ द्विधा ॥ परस्मैपदमाख्यातं तिङां नावा
त्मनेपदं ॥ १३ ॥ परस्मैवात्मने भागे वचनानि त्रिधा
॥ त्रिधा ॥ त्रयस्ते पुरुषा ज्ञेयाः प्रथमो मध्यमोत्तमा
एकद्विबहुसंज्ञानि पदान्येकैकशस्तिङां ॥ परस्मैक
र्तरि ज्ञेयं न भावे नापि कर्मणि ॥ १५ ॥ आत्मनेतु त्रिषु
ज्ञेयं [illegible] वे कर्त्तरि कर्मणि ॥ धातोः कर्मसंज्ञाव प्रथमे क
र्मचतथा ॥ १६ ॥

सक कर्मकाज्ञातो कर्तरिस्मतमात्मन ॥ यत्तुकर्मणि
निर्दिष्टंवर्ततेसकर्मकात् ॥१७॥ नाम्नैव स[illegible]नियो
ग्यः प्रथमःपुरुषो भवेत् ॥ त्वंयुवांयुवमित्येभी त्रि
॥२॥ भिरेनतुमध्यमः ॥१८॥ अहंमावांवयमित्येभि
[illegible]रुत्तमो नान्यथामतः ॥ कृतः त्रिष्वपिवर्तते भा
वेकर्तरिकर्मणि ॥१९॥ अजन्तूलुट्क्रिसे[illegible]भमो ॥२॥
भावेयोजकारोम एवच ॥ सकर्मा कर्मवाच्यातोः
तो सविकर्म[illegible] भावयो ॥२०॥ कृत्याश्चैव खल
र्थाश्चतयोरेवानुवर्तिता ॥ त्रिषुगायपर्वक्ता
दिभ्यः तथा[illegible]चैवाविकर्मणि ॥२१॥ रामाय॰

अकर्मकास्समुसेनोवर्त्ततेकर्तृभावयोः॥ इ
ष्मुच गोवतु विचुविपुकारचूशाकतक्ष्णुपिन्न
चूः॥२२॥ उकारा ऐवुकू यपष्ठ ष्टृकादयः क
र्त्तरिस्मृताः॥ भावेचोत्तरकर्माच्यपुतुमुत्ताः
पर्वकाच्छजा॥ कर्मणिप्रथमातेषां द्वितीयातु
विशेषतः॥२३॥ वर्त्तमानेतु निर्दिष्टे वर्त्ततेच
शत्रुसानचो॥ द्रव्यसत्वापरत्वाभ्यांसमासोमनु
सिध्यति॥२४॥ ग्रंथेनाहभयाज्ञातोः श्लोका
नांपंचविंशति॥ परार्थंभावनीनवोढुंप्रभवेयंभ
वेभवे॥२५॥ इतिश्रीवररुचिविरचितेकारकचक्रंस
माप्तः॥ ॥

अथप्रयोगमिच्छंतेति ॥ योयथाविहितंशुद्धं
प्रयोगंज्ञातुमिच्छति । तेनआदितःकारकंज्ञेयमिति ॥
तत्रकारकसंज्ञायांषड्विधंकर्त्तृकर्मकरणसं
॥३॥ प्रदानापादानाधिकरणानीति ॥ तद्भेदाःपुनः
त्रयोविंशतिधाभवंति ॥ तत्रपंचविधेतितत्रत ॥३॥
स्मिन्नत्रयोविंशतिधेतिकथं ॥ पंचविधःकर्त्ता ॥
सप्तविधंकर्मैव ॥ द्विविधंकरणं ॥ त्रिविधंसंप्रदा
नं ॥ आपादानंद्विधेति ॥ द्विविधंआपादानं ॥
चतुर्विधंआधिकरणंचेति ॥ तत्रपंचविधःक

कर्मस्थया
क्रिययातुल्य
क्रियः कर्ता
कर्मवत् ॥
[illegible]वत् ८
भावे ॥ भि
पते कोष्ठे
न ॥१॥

क्रियायां स्वातंत्रेण विव
क्षितोर्थः कर्तास्यात् ॥२

२

५ कर्तुः प्रयोजको हेतुसंज्ञः कृत्संज्ञ [illegible] वृक्ष्य ॥५
तीयथा ॥ स्वतंत्रः कर्ता ॥ हेतुकर्ता ॥ कर्मकर्ता ॥ अभिहि
तकर्ता ॥ अनभिहितकर्ता ॥ चेति ॥ तत्र स्वतंत्रः कर्तायथा ॥
पुण्यंकरोति श्राद्धः ॥ मैत्रीभजतेसतः ॥ हेतुकर्तायथा ॥
हितंलंभयतिविनीतान्धीराः ॥ कुज्ञायलोकं विनीनं २४
यति ॥ तत्र प्रयोजको हेतुश्चेतिहि कर्ता ॥ कर्मकर्ता यथा ॥ ३५
स्वयमेवलुच्यंते कुज्ञानबुद्धयः ॥ स्वयमेवदह्यंतेदुष्ट
जनदोषाः ॥ स्वयमेवछिद्यते प्राकृतजनस्नेहाः ॥ कर्म
वत्कर्मणातुल्यक्रियेति कर्मवद्भावः ॥ अभिहितक
र्तायथा ॥ साधुभिः आपाद्यते परार्थः ॥ कर्मसप्त ६ ३
विधंकथं ॥ ईप्सितंकर्म ॥ अनीप्सितंकर्म ॥ ईप्सिता
साधनः पदार्थं व्यापादयंति ॥ अनभिहितकर्तायथा ॥२

४

कर्तुःक्रियया
प्तुमिष्टतमंका
रकंकर्मसंज्ञं
स्यात्॥४॥

॥४॥

पं८

नीप्सितंकर्म॥अकथितंकर्म॥कर्त्तृकर्म॥अभिहितं
कर्म॥अनभिहितंकर्म॥चेति॥तत्रईप्सितंकर्मय
था॥दुर्विज्ञानमपिधर्मंज्ञातुंश्रद्धयासुदारधीः॥
कैश्चिदीप्सितत्वमेवकर्मेतिकर्मसंज्ञा॥अनीप्सितक
र्मयथा॥कन्यापामपिधर्मंप्रतिशिक्षितंपितापप्र ॥४॥
बुद्धयः॥रविविसितंभक्षयंतिशुद्रा॥तेपायूतंक्रा
नीप्सितमितिकर्मसंज्ञा॥ईप्सितानीप्सितंकर्मयथा॥
पायसंभक्षयन्नुपरिपतितरजःप्रत्यभ्यव[illegible]
रतिकुमारः॥अनाहतचाद्रजसोनेने[illegible]
ईप्सितलक्षणंकर्तुःक्रिययाप्तुमिष्टतमंकारकंकर्मसंज्ञंस्यात्॥

चि ४

आपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यात् ॥ ४ ॥

नीप्सितत्वं ॥ अकथितं कर्म यथा ॥ गां दोग्धि पयो गोपालः ॥ यज्ञदत्तं याचते कंबलं ब्राह्मणः ॥ व्रजं अवरुद्धि गां गोपालः ॥ उपाध्यायं पृछति मार्गं सिष्याः ॥ ईप्सितारं भिक्षते सुवर्णं अकिंचनः ॥ वृक्षमवचिनोति फलानी दारकः ॥ शिष्यं ब्रवीति धर्मं गुरुः ॥ पुत्रमनुशास्ति शास्त्रमुपाध्यायः ॥ अकथितं चेत्तेन न कर्म संज्ञा ॥ कर्तृ कर्म यथा ॥ गच्छति शिष्यो ग्रामं ॥ गमयति शिष्यं ग्रामं गुरुः ॥ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ ॥ तेन न कर्म संज्ञा ॥

॥ गतिबुद्धि

काणामकर्मकाणां चाणौ यः कर्त्ता स णौ कर्म स्यात् ॥ शत्रूनगमयत्स्वर्गं वेदार्थं स्वान्

वेदयत ॥ आशयच्चामृतं देवान्वेदमध्यापयद्विधिं

॥ आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥ २ ॥ शोधर

॥५॥

क्रियासि
द्धौप्रकृष्टो
पकारकंक
रणसंज्ञं
स्यात्॥२

अभिहितंकर्मयथा॥कटःक्रियतेदेवदत्तेन॥अनभि
हितंकर्मयथा॥कटंकरोतिदेवदत्तः॥कतमंद्विवि
धंकरणं॥बाह्यमाभ्यंतरंचेति॥शरीरावयवादन्य
त्बाह्यं॥यथादात्रेणलुनातिव्रीहिन्नरः॥परशु
नाछिनत्तिवृक्षंदेवदत्तः॥आभ्यंतरंयथा॥शरी
रावयवांतंपत्तदाभ्यंतरं॥यथामनसापाटलि
पुत्रंगच्छतिदेवदत्तः॥चक्षुसारूपंगृह्णातिनरः॥
साधकतमंकरणमित्यनेनकरणसंज्ञायां॥क
र्तृकरणयोस्तृतीयेतितृतीया॥कतमंत्रिविधं
हितेकर्तरिकरणेचतृतीयास्यात्॥रामेणबाणेनहतोवालि॥१२॥

अनभि

॥५॥

संप्रदानं ॥ प्रेरक अनुमंत ॥ अनीराकर्त्तेचेति ॥ तत्र
प्रेरकं यथा ॥ ब्राह्मणाय गां ददाति धार्मिकः ॥ अ
हि ब्राह्मणो न रमा साच गां मह्यं देहीति प्रेरयति
स्म ॥ प्रेरकमित्युच्यते ॥ अनुमत यथा ॥ अतिथये
वृषभमुलं ददाति तपोधनः ॥ स चातिथिर्वृषभमुलं [illegible] म
ह्यं देहीति न तावत्प्रेरयति तेन दीयमानमनुमन्यते तस्मा
दनुमं[illegible]त्रि[illegible]च्युते ॥ अनीराकर्तृ यथा ॥ पुरुषोपात्रमा
य पुष्पं ददाति पुरुषः ॥ स पुरुषोत्तमो पुष्पं मह्यं न देहि
ति न निराकरोति ॥ तस्मा अनिराकर्तृत्वमुच्यते ॥ राम

॥दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यात्॥ चतुर्थी संप्रदाने॥ अनुक्ते [illegible]

कर्मणा यमभिप्रैति स संप्रदानमिति संप्रदानसंज्ञायां च
तुर्थी संप्रदाने इति चतुर्थी॥ कतमद्द्विविधं आपादानं॥
चलं अचलं चेति॥ चलं यथा॥ धावतोऽश्वात्पततीति सार
थिः पतति धावतो हस्तिनोऽङ्कुशधारकः॥ अचलं यथा॥
ग्रामात् आगच्छति देवदत्तः॥ पर्वतात् अवतरति [illegible]र्प
पः॥ ध्रुवमपाये पादानमित्यपादानसंज्ञायां॥
आपादाने पंचमीति पंचमी॥ कतमत् चतुर्विधं अधिकर
णं॥ व्यापकं औपश्लेषिकं वैषयिकं सामीपकं चेति॥ तत्र
व्यापकं यथा॥ तिले तैलं आस्ते॥ औपश्लेषिकं यथा॥ क
टि आस्ते पुरुषः॥ शकटे आस्ते ब्राह्मणः॥ वैषयिकं यथा॥

ह४

॥६॥

अपायो विश्ले
षस्तस्मिन्सा
ध्ये ऽवधिभू
तमपादा
नं॥ आपादा
ने पंचमी॥
ग्रामादाय
ति॥५॥

व२

॥६॥

कर्तृकर्मद्वारातन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात्।

मोक्षेरछास्ति

वनेषुशार्दुलानसंति॥सामिपकं यथा॥ नद्यांवसति
घोषः॥आधारोधिकरणमिसधिकरणस[illegible]या
सत्सम्यधिकरणेचेतिसप्तमि॥यदिकरोतितिका
रकमित्यर्थसंज्ञा॥तर्हिकर्तैवकारकसंज्ञोभवति
नेतरे अत्रोच्यते॥तान्यपिकारकाण्येवकुतः॥तत्तद्व्या
पारेपिस्वातन्त्र्यविवक्षायांप्रतिकारकंस्वातन्त्र्यंवि
वक्ष्यतेअतःकर्मकरणसंप्रदानापादानाधि
करणानामपिकारकत्वंसिद्धं॥ तत्रकर्तर्यभि
हितेप्रथममेवविधीयते॥इतिकोपः॥

६ अनभिहिते कर्तरि करणे च तृतीयास्मात् ॥ ६

अत्र कर्तृकर्मकरणसंप्रदानापादानाधिकरणेषु म
ध्येऽभिहिते कर्तरि प्रथमैव भवति ॥ यथा पच [illegible] ओदनं
देवदत्तः ॥ तृतियाथवाषष्ठि वास्यात्तानभिहिते
द्विध्येति कोऽर्थः ॥ अनभिहिते कर्तरि द्विविभक्तिर्भ ॥७॥ ब
वतः ॥ तृतियाथवाषष्ठी ॥ तत्र तृतीया यथा ॥ ओद ॥७॥
नः पच्यते देवदत्तेन ॥ कर्तृकरणयोस्तृतीयेति तृ
तीया ॥ षष्ठी यथा ॥ परलोकहितस्य सेवितमाध
र्मः ॥ कृत्यानां कर्तरि वेति षष्ठी ॥ तथा कर्मण्यभि
हिते विभक्तिं चिद्दिप्रत्येकामिति कोऽर्थः ॥ यथाभ
भिहिते कर्तरि प्रथमा तथा कर्मण्यभिहिते प्र थ
रि
भवति
कर्मणि

मेवभवति। यथा ओदनः पच्यते देवदत्तेन।। आहारो
दियते देव■दत्तेन।। अनुक्ते प्रथमा। क्रियापंचमीस
प्तमिं तथेति तस्यायमर्थः।। अनुक्तेवेमीणाप्रथमा
पंचमिं सप्तमिं वर्ज इत्यासैंषाश्च तस्त्रो विभक्तयो
भवंति। ताः शेषाः।। द्वितिया तृतिया चथी२ षष्ठी
चेति।। द्वितिया यथा।। ग्रामं गच्छति पुरुषः।। कर्म
णि द्वितियेति। द्वितिया।। तृतिया यथा।। [illegible] पु
त्रेण संजानिते पीता। पुत्रं संजानित रु सर्पः।।
संज्ञोन्यतरस्यां कर्मणि तृतिया।। चतुर्थी यथा।।
सर्वस्य जानाते कर्मणि तृतीया।। १।। पित्रा पितरं वा संजानिते।। १।।

२ अनुक्ते क
र्मणि द्वती
या स्यात् ३

मिन्ने प्रक्षालस्र सर्पः ॥ ज्ञोविदर्थस्य करणे इति षष्ठी ॥ पृथि चतु-र्थी

व्यामासमजयति पुरुषः ॥ गे[illegible]पी कर्मणि द्वितीया चतुर्थ्यौ

चेष्टायामनध्वनीति चतुर्थी ॥ षष्ठी यथा ॥ कटस्य कारको

देवदत्तः ॥ कर्तृकर्मणोः कृति षष्ठी ॥ तृतियापंचमी येव

षष्ठी चकरणे त्रिधेति ॥ तृतिया यथा ॥ परशुनं [illegible] छि

छिनत्ति देवदत्तः ॥ कृतपरणयोस्तितियेती तृतिया ॥

पंचमी यथा ॥ स्तोकान्मुक्तः ॥ स्तोकेन मुक्त इत्यर्थः

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्ये

ति पंचमी ॥ षष्ठी यथा ॥ पुरुषमृग[illegible]श्चंद्रमसो वा

त्स्यः ॥ चंद्रमसे दातमस्यर्थः ॥ चतुर्थ्यै बहुलं

छंदसीति संप्रदाने षष्ठी ॥ चतुर्थ्यर्थे ॥ श्रुचि

तायओदनं ददाति देवदत्तः ॥ चतुर्थी संप्रदानेति चतुर्थी ॥

आनाधेरजौ थे स्वकरणे शेष[illegible] ॥ ॥ [illegible]

विवक्षिते षष्ठि

नं२

ती

[illegible]

१८

समोदाणस्तृतीयान्ते न युक्तादुक्तं स्यात्तृतीया चेच्चतुर्थ्यर्थे ॥ २

तृतीयायथा ॥ दास्या संयच्छते युवा दास्यै मानं ददा
तीत्यर्थः ॥ समस्तृतीया [illegible]
भि[illegible] युक्तात् ॥ दाणश्च सा चेच्चतुर्थ्य
र्थे इति तृतीया ॥ उभयमनेन संभाष्यते ॥ तृतीयाविभक्ति
रात्मनेपदविधानं च ॥ पदप्रयोगस्तृतीयायुक्ताद्दा
णः दाणः श्च सा चेच्चतुर्थ्यर्थे र सात्मनेपदमनुशास्ति ॥
अशिष्टमवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्त
व्यं ॥ असिष्ट व्यवहारो ॥ द्वि ॥ पंचमि स्वल्पपादाने
वर्त्तते न तथान्यथेति ॥ पंचमि यथा ॥ ० पूर्व
तादरस्तरतीति महर्षयः ॥ आपादाने पंचमीति पंचमी ॥
धूर्त व्यवहारा ३

असिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया ॥ धर्मे तु भार्यायै संप्रयच्छति ॥

स सम्येवाधिकरणेकारकस्येषसंग्रहामृति॥
सप्तमीयपा॥मामेवसतिंसस्याधिकरणेचे
तिसप्तमि॥ २ कारकस्येषसंग्रहः इति दिङ्मा
त्रप्रदर्शनार्थमात्रोक्तः॥ कारकसंग्रहः विस्ता
रेणैवसादिषुद्रष्टव्य आदति॥ इतिवररुचिकृ
तप्रयोगविधिसंग्रहेप्रथमःपटलः॥ १ ॥
रामसमर्थ॥ अथक्लक्षितोभिहितानभिहिततया
समासः॥ क्रिपंतस्तदभिधायकाः॥ अनभि
धायकावाउच्यते॥ समासः॥ तद्धितास्तिङ्-दू
तेचत्वारोभि[illegible]धायकाः॥ तएवानभिसंब

धोभवंसनभिधायकाइति ॥ अस्यां ॥ अवस्थाया
म..भिधायकाउच्यंते ॥ कर्मणौ बं[illegible]वा अभिसं
बंधे अभिधायकाउच्यंते ॥ षट्समासाश्चँदष्ट
विंशतिधा पुनः नित्यानित्यत्वयोगेन लुगलुकत्वेन
च द्विधेति ॥ षट्समासाश्च संक्षेपादिति ॥ तत्पुरुषः ॥
कर्मधारयः ॥ बहुव्रीहिः ॥ द्विगुः ॥ द्वंद्वः ॥ अव्ययी
भावश्चेति ॥ त एव विस्तारे ००ष्टाविंशतिधा भवंति ॥
पश्चात्तस्य विभागं वक्ष्यामः ॥ नित्यानित्यत्वयोगे
नेति कोऽर्थः ॥ द्विविध समासो भवति ॥ नित्यस
मासो अनित्यसमासश्चेति ॥ नित्यसमासो यथा ॥

त्री २
संक्षेपो ३

कर्मणि उपपदे धातोर्ण् स्यात् ५
प्रकर्षेण वरः प्रवरः ॥ कुंभं करोतीति कुंभकारः ॥ यद्वि
नित्यसमासोयं कथं कुंभं करोतीति वाक्यं क्रियते ॥
नैषदोषः अपरशब्देनाप्यर्थः [illegible] प्रतिपाद्यत इति ॥
यथा स्त्रियमधिकृत्य प्रवर्तते अधिस्त्रि इति ॥ कर्मण्य ॥२१॥
णित्यण् ॥ उपपदमतिङ् इति समासः ॥ अनित्य
समासो यथा ॥ रा[illegible] ज्ञः पुरुषः ॥ राजपुरुषः ॥ रा ॥२०॥
ज्ञः पुरुष इति वा ॥ ब्राह्मणस्य कंबलो वा ॥ ब्राह्म
णकंबलेत्यादि ॥ षष्ठीसमासः ॥ विभाषितत्वा ति ३
दनित्यत्वमुच्यते ॥ लुगलुग्भेदेन च द्विधेति ॥ लुक्
व समासे अलुक्समासश्चेति ॥ लुक्समासो यथा ॥

द्वितियांतं श्रितादिभिः समः स्यूते
कृष्णं श्रितः ॥ कृष्णश्रितः ॥ द्वितियाश्रितातीतपतितग
तात्यस्तप्राप्तापन्नैरिति समासः ॥ एतद्धितसमासौ
श्चप्रातिपदिकसंज्ञाः ॥ सुपो धातुप्रातिपदिक
योरिति सुपो लुक् ॥ अलुक् समासो यथा ॥ कंठे
कालो यस्य सः ॥ कंठेकालः ॥ उरसिलोमानि यस्य
सः ॥ उरसिलोमा[illegible] ॥ सप्तम्युपमानपूर्वपदस्य व
हुव्रीहिर्वाच्ये वोत्तरपदलोपश्चेति समासः ॥ ए
तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा ॥ सुपो धा
तुप्रातिपदिकयोरिति सुपो लुक् प्राप्ते ॥ राम ॥

त्रि
एतयोरप्य
यवः स्येसु
पोलुकस्या
त् ३

एतद्धितांते
समासाश्च
तथा सुः २

स्वां१

॥२२॥ अलुगुत्तरपदस्य धिकृसामर्द्दमस्तनो [illegible]गादका
नेइति सप्तम्या अलुक् ॥ ए ॥ तत्र अषध्यातपुरुषे ॥ प्र
थमातत्पुरुषः ॥ द्वितियातत्पुरुषः ॥ तृतियातत्पुरुषः ॥
चतुर्थ्यीतत्पुरुषः ॥ पंचमितत्पुरुषः ॥ षष्ठितत्पुरुषः ॥
सप्तमीतत्पुरुषः ॥ नञ्तत्पुरुषश्चेति ॥ तत्र प्रथ ॥११॥
मातत्पुरुषो यथा ॥ पूर्वः का[illegible]यस्य स [illegible]पूर्वका
यः ॥ अपरः का[illegible]यस्य स [illegible] अपरकायः ॥ पूर्वापध रो
रोत्तरमेकदेशेनैकाधिकरणे ॥ इति समासः ॥
अर्द्धं पिप्पल्या अर्द्धपिप्पलि ॥ अर्द्धको ज्ञातव्यः ॥

अर्द्धकोशातकी॥ अर्द्धंनपुंसकमिति समासः॥ द्विति
यंभिक्षायाः॥ द्वितीयभिक्षा॥ भिक्षाद्वितियं॥ तृती
यंभिक्षायाः तृतीयभिक्षा॥ भिक्षातृतीयं॥ चतुर्थं
भिक्षायाइतिचतुर्थभिक्षा॥ भिक्षाचतुर्थं॥ तुर्यंभि
क्षायाः॥ तुर्यभिक्षा॥ भिक्षातुर्यं॥ द्वितीयतृती
पं४ यचतुर्थतुर्याण्य[illegible]तरस्यांमिति समासः॥ प्रा
प्तोजीविकां॥ प्राप्तजीवीकः॥ आपन्नोजीविकां॥
आपन्नजीविकः॥ प्राप्तापन्नेचद्वितीयेति समा पं२
सः॥ कस्मात्प्रथमतत्पुरुषमुच्यते॥ पूर्वपदस्य

त्रप्थमांतत्वादे॥

पाविभक्तिः पूर्वपदस्यभवतितयाविभक्त्याविशेषितत्वात्प्रथमातत्पुरुषस्सूच्यते॥ द्वितियातत्पुरुषोयथा॥ वृक्षं श्रितः॥ वृक्षश्रितः॥ कांतारं अतितः॥ कांतारातीतः॥ नरकं पतितः॥ नरकपतितः॥ ग्रामंगतः॥ ग्रामगतः॥ दूरं अत्यस्तः॥ दूरात्यस्तः॥ तरंग अत्यस्तः॥ तरंगात्यस्तः॥ सुखं आपन्नः सुखापन्नः॥ द्वितियाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति समासः॥ वर्षभोग्यः॥ वर्षभोग्यः॥ योजनं प्रे[illegible]रितः॥ योजनप्रे[illegible]रितः॥

कालाध्वनेरत्यंतसयोगेतिद्विति ॥ अत्यंतसंयो या १
गेचेइतिसमासः ॥ तृतीयातत्पुरुषोयथा ॥ शं
कुलया[illegible]खंडः ॥ शंकुलाखंडः ॥ तृतीयातत्कृता
ने४ र्थेगुणवचनेनेतिसमासः ॥ मासेनपूर्वः मा
ण४ सपूर्वः ॥ संवत्सरैपूर्वः ॥ संवत्सरपूर्वः ॥ वाचां
निपुणः ॥ वाङ्निपुणः ॥ पूर्वसदृशसमोना
र्थकलहनिपुणमिश्रश्लक्ष्णैरितिसमासः ॥
चतुर्थीतत्पुरुषोयथा ॥ यूपायदारु ॥ यूपदारु ॥

कुंडलाय हिरण्यं ॥ कुंडलहिरण्यं ॥ तादर्थ्ये चतु
र्थी वक्तव्येति चतुर्थी ॥ अर्थेन नित्यसमा
सवचनं सर्वलिंगता वक्तव्या ॥ ब्राह्मणाय
॥१३॥ अर्थः ॥ ब्राह्मणार्थः ॥ ब्राह्मणार्थे [illegible] इयं मः ॥
ब्राह्मणार्थं इदं पयो ब्राह्मणार्थं पयः ॥ ब्राह्म ॥१२॥
णाय बलिः ॥ ब्राह्मणबलिः ॥ तस्मै हितं ॥
तद्धितं ॥ आत्मने सुखं ॥ आत्मसुखं ॥ वि
ष्णवे रक्षितं ॥ विष्णुरक्षितं ॥ चतुर्थी तदे

थीर्थे बलिं कितसुखं रक्षितेरिति समासः ॥
पं[illegible]च मितत्पुरुषो यथा ॥ सिंहाद्भय ॥ सिंहभ
य ॥ चोराद्भय चोरभय ॥ दस्युभ्यः ॥ भयं ॥
दस्युभय ॥ पंचमि भयेनेति समासः ॥ अपी
त अपेतः ॥ अपपीपेतः ॥ सुखात् अपोढः ॥ सु
खापोढः ॥ अपेतापोढमुक्तपतितापत्रस्तैरल्प
शा इति समासः ॥ षष्ठि त्पुरुषो यथा ॥ वृक्ष
स्य मूलं ॥ वृक्षमूलं ॥ वृक्षस्य फलं ॥ वृक्षफ
लं ॥ षष्ठी समासः ॥ ब्राह्मणस्य याजकः ॥ ६५ ॥

ब्राम्हणयाजकः ।। क्षत्रियस्ययाजकः ।। क्षत्रियया
जेर जकः ।। याजकादिभिश्चेति समासः ।। सप्तमितत्पु
रुषो यथा ।। अक्षेषुशौंडः ।। अक्षशौंडः ।। सप्तमि
शौंडैरिति समासः ।। पाटलिपुत्रेसिद्धः ।। पाटलि
।।१४।। पुत्रसिद्धः ।। सिद्धशुष्कपक्वबंधैश्चेति समासः ।। ।।१४।।
नञ्तत्पुरुषो यथा ।। नब्राह्मणः अब्राह्मणः ।।
न अश्वः अनश्वः ।। नञिति समासः ।। सप्तधा
कर्मधारयः ।। कतमाः विशेषणपूर्वपदः ।। वि
शेष्यपूर्वपदः ।। विशेषणोभयपदः ।। उपमानपूर्वपदः

स

उपमानउत्तरपदः ।। संभावनापूर्वपदः ।। अव
धारणापूर्वपदश्चेति ।। तत्र विशेषणपूर्वपदे
यथा ।। नीलं च तत् उत्पलं च ।। नीलोत्पलं ।। कृष्ण
श्चासौ सर्प श्चेति कृष्णसर्पः ।। विशेषणं विशे
ष्येण बहुलमिति समासः ।। विशेष्यपूर्वपदे
यथा ।। वैयाकरणश्चासौ वररुचिश्च ।। वै
याकरणवररुचिः ।। निपरप्रतिभावः ।। कुत्सि
तानी कुत्सनैरिति समासः ।। विशेषणेभ[illegible]य
पदसमासो यथा ।। शीतं च तत् उष्णं च ।। शीतोष्णं ।।

स

अत्रापि विशेषणविशेष्यबहुलमिति समा-
सः ॥ उपमानपूर्वपदो यथा ॥ शंख इव पांडुरः ॥
शंखपांडुरः ॥ उपमानानि सामान्यवचनैरिति
समासः ॥ उपमानोत्तरपदो यथा ॥ पुरुषोयं ॥१५॥
व्याघ्र इव पुरुषव्याघ्रः ॥ नरोयं सिंह इव नर- ॥१५॥
सिंहः ॥ पुरुषोयं वृषभ इव ॥ पुरुषवृषभः ॥
उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति
समासः ॥ संभावनापूर्वपदो यथा ॥ गुण
इति बुद्धिः ॥ गुणबुद्धिः ॥ पुत्र इति ग्रहः ॥

पुत्रगन्धा ॥ विशेषणं विशेष्येणा बहुलमिति
समासः ॥ अवधारणापूर्वपदो यथा ॥ गुण
वचन ॥ गुणवचनं ॥ सुकृतमेव बंधुः ॥ सुकृ
तबंधुः ॥ मयूरव्यंसकादयश्चेति समासः ॥ स
प्तधा बहुव्रीहिरिति रूप ॥ द्विपदः ॥ बहुपदः ॥
संख्योत्तरपदः ॥ संख्योभयपदः ॥ सहपूर्व
पदः ॥ व्यतिहारलक्षणः ॥ दिगन्तरालक्षणा
श्चेति ॥ द्विपदोस्तावत् आरूढवानरो वृक्षो
सभवसारूढवानरो वृक्षः ॥ निर्जितः कामो

॥१

येनभगवतासोयंनिर्जितःकामोभगवान्॥उपनि
तंभो[illegible]जनयस्मैब्राह्मणायस॥उपनीतंब्राह्म भोजनोर
णः॥निष्क्रांतोजनोयस्मान्नगरात्तद्भवतिनि
॥१६॥ ष्क्रांतजनंजनंनगरं॥शुक्लःपटोयस्यपुरुषस्य
सभवति॥शुक्लपटःपुरुषः॥उषितोविभवोय ॥१६॥
स्मिन्ग्रामेसभवतिउषितविभवोग्रामः॥वि
शेषोबहुव्रीहिरियं॥चतुष्टय॥अनेकमेसप
दार्थेइतिसमासः॥बहुपदोपपथा॥श्रीराम॥

पराक्रमेण उपार्जिताः संपदो येस्ते ॥ पराक्रमोपा
र्जितसंपदः ॥ पूर्ववत्समासः ॥ संख्योत्तरपदो
यथा ॥ उपसमीपे दश नामिमे पुरुषाः ॥ उपदशाः ॥
उपसमीपे विंशति नामिमे पुरुषाः उपविंशाः ॥
संख्योभयपदो यथा ॥ द्वौ वा त्रयो वा द्वित्राः ॥ सं
ख्ययाव्ययासन्नादूराधिकसंख्याः संख्ये[illegible]र
तिसमासः ॥ बहुव्रीहौ संख्येये डज् बहुगणा
दिति डच् समासांतः सह पूर्वपदो यथा ॥

ये३

सहमुक्तेनयस्तस्यषुद्धजः सभवति ॥ सहमुक्तोद्ध
स्तरः ॥ तेनसहेतितुल्ययोगइतिसमासः ॥ वोप
सर्जनस्येति सहशब्दस्य वाऽभावः ॥ अतिकार
॥१७॥ लक्षणे यथा ॥ केशेषु केशेषु गृहीत्वाइदं युद्धप्र ॥१७॥
वर्ततेइति ॥ केशाकेशि ॥ यद्ध ॥ दंडैश्चदंडै
श्चप्रहृत्येदं युद्धप्रवर्ततइति दंडादंडि ॥ युद्ध ॥
तत्रतेनेदमितिसरूपइतिसमासः ॥ अन्येषाम
८१ पिदृश्यतेइति पूर्वपदस्य दीर्घत्वं ॥ राम ॥ ध ॥

इच्कर्मव्यतिहार इति इच्चु समासांतः ।। यस्ये
ति चेत्यकारलोपः ।। तिष्ठद्गुप्रभृतीनि चे
त्यव्ययीभावः ।। अव्ययीभावश्चेत्यव्ययसं
ज्ञायां अव्ययादाप्सुपः इति सुपो लुक् ।।
दिगंतरालक्षणाय था ।। दक्षिणस्याश्च
पूर्वस्याश्च दिशोर्यदंतराळं सेयं दक्षिणा
पूर्वा ।। दिक् ।। उत्तरस्याश्च पूर्वस्याश्च दि
शोर्यदंतरालं दिगुत्तरपूर्वा ।। दिङ्नामान्यं ना१
तराळ इति समासः ।।

सर्वैनाम्नोवृत्तिमात्रेवैपेपदस्यपुंवद्वचनेमि
तिपुंवद्भावः ॥ द्विगुस्सभाषितोद्विश्चेतिकथ्यं ॥
एकवद्भावि ॥ अनेकवद्भावी ॥ एकवद्भावीय
॥१८॥ पा ॥ त्रीणिशृंगाणिसमाहृतानिति ॥ त्री
शृंग ॥ पंचमूलाः समाहृताइतिपंचमूलि ॥ ॥१८॥
तद्धितार्थोत्तरपदसमाहारेचेतिसमासः ॥
संख्यापूर्वोद्विगुरितिद्विगुसंज्ञायांद्विगु
रेकवचनमियेकवचनभावः ॥ श्रीराम ॥

सनपुंसकमितिसनपुंसकत्वं ॥ अकारांतोत्तर
पदोद्विगुस्त्रियांभाष्यतइतिस्त्रीलिंगतापोद्विगो
रितिङीप् ॥ त्रि ॥ श्रृंगादिभ्यस्तुनभवति ॥ पात्रा
श्लो४ दिभ्यः प्रतिषेधोवक्तव्यइति ॥ अनेकवद्वाविषया ॥
चतस्रः दिशः चतुर्दिशः ॥ त्रयाः लोकाः ॥ त्रि[illegible]
लोकाः ॥ दिक्संख्येसंज्ञायामितिसमासः ॥ द्वंद्व
श्चतुर्विधोज्ञेयइतिकथं ॥ समुच्चयः ॥ समा
हारः ॥ अन्वाचयः ॥ इतरेतरयोश्चेति ॥ तत्रस
मुच्चयान्वाचययोरसामर्थ्यात्समासेनास्ति ॥

सैमर्थैः पदविधिरिति चकारार्थे ।। समुच्चयो यथा ।।
तर देवदत्तः पचति यज्ञदत्तश्च ।। अन्वाचयो यथा ।। भिक्षां
अट गाश्च ।। नय समाहारो यथा ।। शंखश्च पटह
श्च ।। शंखपटहं ।। द्वंद्वश्च प्राणितूर्यसेनांगानामि
त्येकवद्भावः ।। स नपुंसकमिति नपुंसकसंज्ञा ।। इत
रेतरयोगो यथा ।। देवदत्तश्च य[illegible]दत्तश्च ।। देव
दत्तयज्ञदत्तौ ।। विवादं कुरुतः ।। श्चौ पर्ये द्वंद्व इति द्वं
द्वसमासाः ।। अव्ययीभावो द्विधा मत इति कथं ।।
नामपूर्वपदोऽव्ययपूर्वपदश्चेति ।। नामपूर्वपदो यथा ।।
शाकस्य मात्रा ।। शाकप्रति ।। फलस्य मात्रा फलप्रति ।।

सुप्रतिनामात्रार्थे इति अव्ययीभावः ॥ अव्ययपूर्वपदे
यथा ॥ कुंभस्य समीपे वर्तत इत्युपकुंभं ॥ अव्यय
विभक्तिसमीपसमृद्धिव्यृध्यर्थाभावात्ययासंप्रति
शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसा
दृश्यसंपत्तिसाकल्यांतवचनेष्विति समासः ॥
क्रमं अनतिक्रम्य अव वर्तते इति यथाक्रमं ॥ यथे
वृद्धः यथा ॥ यथावृद्धं ॥ ब्राह्मणानामंत्रयस्व ॥
यथासादृश्ये इति समासः ॥ यावदमंत्र ब्रा
ह्मणानामंत्रमस्व यावंति आमंत्रिणासंभवति

तावतोव्रास्मणाानामंत्रयस्वेयर्थः ॥ यैावैदैवैधौ
रैणौइति सैमौसैः ॥ तेषांपुनः समासानां प्राधा
न्यतुचतुर्विध इति मिसस्नाममर्थः ॥ पूर्वपदा
॥२०॥ र्थप्रधानः ॥ उत्तरपदार्थप्रधानः ॥ अनपदा ॥२०॥
र्थप्रधानः ॥ उभयपदार्थप्रधानः ॥ तत्पूरूषो
द्विप्रधानः ॥ पूर्वपदार्थप्रधानः ॥ उत्तरपद
र्थप्रधानः ॥ पूर्वपदप्रधानो यथा ॥ पुरुष
व्रक्षः ॥ उत्तरपदार्थप्रधानो यथा ॥ रामः ॥

नीलोत्पलं ॥ बहुव्रिहीर्द्विप्रधान: ॥ अन्यपदार्थ
प्रधान: ॥ उभयपदार्थप्रधान: ॥ अन्यपदा
र्थप्रधानो यथा ॥ आरूढवानरो वृक्ष: ॥ चि
त्रगुर्देवदत्त: ॥ उभयपदार्थप्रधानो यथा ॥
द्वित्रि: द्वंद्व: उभयपदार्थप्रधान एव ॥ यथा इ
रषपृटे ॥ द्विगुस्ते पदार्थप्रधान एव ॥ यथा
त्रिशृंग: ॥ अमयीभावाव्यप्रधान: ॥ पूर्व
पदार्थप्रधान: ॥ उत्तरपदार्थप्रधान: ॥ राम ॥

२१

अन्यपदार्थप्रधानः ॥ पूर्वपदार्थप्रधानोयथा ॥ उप
कुंभं ॥ उत्तरपदार्थप्रधानोयथा ॥ राजप्रति ॥ अन्य
पदार्थप्रधानोयथा ॥ उन्मत्तागंगायस्मिन्देशेस
भवति ॥ उन्मत्तगंगोदेशः ॥ अन्यपदार्थेचसं
॥२१॥ ज्ञायामितिसमासः ॥ स्त्रियाः पुंवद्भाषितपुं
स्कात् अनूङ् समानिधिकरणेस्त्रियामपूरणी ॥२१॥
प्रियादिष्वितिपुंवद्भावः ॥१९॥ इतिउक्तंसमा
सलक्षणसमाप्तः ॥ छ ॥ श्रीराम ॥ छ ॥ छ ॥
अथप्रास्तावसरंतत् विचलक्षणंविधीस्यामः ॥

सामान्यामयभावाख्यंस्त्रिविधस्तद्धितोमतइति ।। अ
स्याममर्षः ।। सामान्यवृत्तिः ।। अअवसंज्ञा ।। भवत्वचन
श्चेति ।। त्रिप्रकारः ।। सच ।। पदानां सुसमर्थानां प्रथमा
द्वाप्रसुप्यतकोर्थे: ।। अन्येकेषांपदानांपरस्परसमर्थानां
प्रथमादेवपदात्तद्धितःप्रसयःप्रसुपते ।। तत्रसान्यवृत्ति
स्तावत् ।। मतुप् ।। लच् ।। इलच् ।। शः ।। मः ।। रलच् ।। णः ।।
उरच् ।। रः ।। वः ।। वलच् ।। इलिठन् ।। विनिः ।। युस् ।।
ग्मिनिः ।। आलच् ।। आटच् ।। इनच् ।। आरकन् ।। आलु
च् ।। चैलुः ।। चुल ।। सल ।। अण् ।। वुन् ।। खञ् ।। अञ् ।

इञू ॥ पकू ॥ मञू ॥ ठकू ॥ पकू ॥ यञू ॥ मुकू ॥ ढ्रेएरकू ॥
ठकू ॥ आरकू ॥ यः ॥ खुः ॥ एयूः ॥ मतु ॥ इतु ॥ स्नूंवे ॥ अ
नडू ॥ चयापू ॥ वैंचुपू ॥ रथ्वन ॥ रयसुनू ॥ तरपू ॥ तमपू ॥
॥२२॥ कल्पपू ॥ देश्यः ॥ देशीयरू ॥ जातियरू ॥ दयसचू ॥ दघ्र
चू ॥ मात्रचू ॥ उकू ॥ इति पञ्चपञ्चाशत्प्रत्यया भवंति ॥२२॥
तत्र मतुपप्रत्ययः ॥ गुणोयस्यास्ति यस्मिन्वा सो भवति गु
नू३ णवान् ॥ गुणौ ययोर्विद्येते तौ गुणवंतौ ॥ गुणाः ये
षां येषु वा संति ते गुणवंतः ॥ गुणोयस्यास्ति सा गु
णवती ॥ गुणवत्यौ ॥ गुणवत्यः ॥ गुणो यस्य सि

यस्मिन्वावत गुणवत् कुलं ।। गुणवति कुले ।। गुणा
वंति कुलानि ।। सिंदस्यास्मिन्निति मतुप् ।। मादु
पधायाश्च मतोर्वोयवादिभ्यः इति मकारस्य वकारः ।।
लच् प्रत्ययः ।। चूडा यस्यास्ती यस्मिन्वा स भवतीति चूडालः ।।
प्राणिस्था[illegible]दातो लजन्यतरस्याः इति लच् प्रत्ययः ।।
वत्सं कामयत इति वत्सलः ।। अंसोस्यास्तीति अंसलः ।।
ब३ वत्सांसाभ्यां कामबले इति लच् ।। इकेच प्रत्ययः ।। फेनो
स्यास्तीति फेनिलः ।। फेनादिलच् च इति लच् ।। तुंदो
स्यास्तीति तुंदिलः ।। तुंदादिभ्य इलच्च इति लच् ।। राम

शः यथा ॥ लोमानि यस्य संति लोमशः ॥ नः यथा ॥ पामा
यस्यास्तीति पामनः ॥ इलच् यथा ॥ पिच्छं यस्यास्ति स पिच्छि
लः ॥ लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ इति शः ॥
नः ॥ इलच् ॥ इत्येते मात्वर्थीया भवंति ॥ णः यथा ॥ प्रज्ञा
॥२३॥ यस्यास्ति सः प्राज्ञः ॥ श्रद्धा यस्यास्ति सः श्राद्धः ॥ आर्चा
यस्यास्ति सः आर्चः ॥ वृत्तिर्यस्यास्ति स वार्त्तः ॥ प्रज्ञा ॥२३
५ णः श्रद्धार्चवृत्तिभ्यो णः ॥ उरच् यथा ॥ दंता उन्नता
यस्य सः दंतुरः ॥ दंतउन्नतउरच् ॥ इत्युरच् ॥ रः यथा ॥ म
धु यस्यास्ति स मधुरः ॥ ऊषसुषिमुष्कमधोरः ॥ इति र ॥
वः यथा ॥ केशो स्यास्तीति केशवः ॥ केशाद्वोन्यतरस्या
मिति वः ॥ वप्रकरणमणिहिरण्यरूपसंख्यानमशा

स्यास्तीति समहिणाव: ।। हिरण्मयस्यास्ति स हिरंण्मव: ।।
वलच् यथा ।। रजो यस्यास्ति स रजस्वल: ।। रजो यस्या अ
स्ति सा रजस्वला ।। रजः कृष्यासुतिपरिषदो वलजिति
वलच् ।। इनि: यथा ।। धनं यस्यास्ति स धनी ।। ठन् यथा ।।
धनमस्यास्तीति धनिक: ।। अत इनिठनाविति इनि नि ५
ठनौ ।। ठस्येक इति इकादेश: ।। विनि: यथा ।। यशो य
स्यास्ति स यशस्वि ।। माया यस्यास्ति स मायावि ।।
स्रग् यस्यास्ति स: स्रग्वि ।। अस्मायामेधास्रजो विनि
रिति विनि: ।। युस् यथा ।। ऊर्णा यस्यास्ति स ऊर्णा
यु: ।। ऊर्णाया युसिति युस ।। ग्मिनि: यथा ।। राम ।।
यु

वागस्यास्तिति वाग्मी ।। वाचो ग्मिनिः ।। सोचे
ति दीर्घः ।। झरो झरी सवर्णे इति ककारलोपः ।। आलचू यप्पा ।।
यो बहु संबहु भाषते स वाचालः ।। आटच यप्पा ।। यो ब
हु संबहु भाषते स वाचाटः ।। आलजाटचौ बहुभाषिणि
।।२४।। यो आलजाटचौ ।। [illegible]चू यप्पा ।। फलानि यस्य संति स फ ।।२४।।
लिनः ।। बर्हाणि यस्य संति स बर्हिणः ।। फलबर्हाभ्यां
इनचू वक्तव्यः ।। इति इनचू ।। आरकन यप्पा ।। शृंगं य
स्यास्ति सः शृंगा वृंदं यस्यास्ति स वृंदारकः ।। शृंग
वृंदाभ्यामारकन् ।। [illegible]वे तूय इत्यारकन् ।। आलुचू यप्पा ।।
निद्रा यस्यास्ति स निद्रालुः ।। तंद्रा यस्यास्ति स तंद्रालुः ।।

श्रंद्धा यस्यास्ति स श्रद्धालुः ॥ निंद्रा तंद्रा श्रद्धाभ्य आ
लुचू स्यालुचू ॥ शीतं न सहत इति शीतालुः ॥ उष्ण
न सहत इति उष्णालुः ॥ त्रपां न सहत इति त्रपालुः ॥ शी
तोष्ण त्रपाभ्यः सोढं न सहत इत्यालुच्च वक्तव्य इत्यालुच ॥
चल पपा ॥ बलं न सहत इति बलल्लः ॥ बलाश्रू लोने
क्यः ॥ तुल पपा ॥ वातानां समूहो वातूलः ॥ वातं
न सहत इति वा ॥ वातानां समूहो तं न सहत इत्यु
लो वक्तव्यः ॥ हिमं न सहत इति हिमेलुः ॥ हिमा श्चे
लुः तं न सहत इति चेलुर्वक्तव्य इत्यचेलुः ॥ आगु पपा ॥
वर्ष्विष स्यापुरवा सिषः ॥ ऋष्य संघ क वाषि कुरु
ष्यश्चेति आप्रत्ययः ॥

२५

उपगोरपत्यमौपगवः ।। प्राग्दीव्यतोऽण् ।। युविधिषू
यं तस्यापत्यमित्यण् ।। अश्वपतेरपत्यमाश्वपतः ।।
अश्वपत्यादिभ्यश्चाण् ।। जनपदो निवासोऽयस्य
स जानपदः ।। सोऽस्य निवास इत्यण् ।। व्याकर
२५ णमधीते वेत्ति वा वैयाकरणः ।। तदधीते २५
तद्वेदेत्यण् ।। न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामै
च् ।। ऐजागमः ।। वुनयण्वा ।। क्रममधीते वेत्ति
वा क्रमकः ।। पदमधीते वेत्ति वा पदकः ।। क्रमा
दिभ्यो वुन्निति वुन् ।। युवोरनाकौ इत्यकादेशः ।।

खञ्प्रत्ययः॥ प्रियंगुवो भवनं क्षेत्रं प्रैयंगविकं॥ मु
द्गानां भवनं क्षेत्रं मौद्गीनं॥ धान्यानां भवने क्षेत्रे
खञिति खञ्॥ अञ्प्रत्ययः॥ पंचालस्यापत्यं पांचालः॥
विदेहस्यापत्यं वैदेहः॥ जनपदशब्दात्क्षत्रियादञि
त्यञ्॥ उत्सस्यापत्यं औत्सः॥ उत्सादिभ्योञित्यञ्॥
इञ्प्रत्ययः॥ दक्षस्यापत्यं दाक्षिः॥ दशरथस्यापत्यं
दाशरथिः॥ अत इञिति इञ्॥ फक्प्रत्ययः॥ नड
स्यापत्यं नाडायनः॥ अश्वलास्यापत्यं आश्वलाय
नः॥ नडादिभ्यः फगिति फक्॥ अण्प्रत्ययः॥ प

२६

गर्गस्यापत्यं गार्ग्यः ।। गर्गादिभ्यो कैत्रितियञ् ।। ढकू
यथा ।। विनताया अपत्यं वैनतेयः ।। सुपर्ण्या अप
त्यं सौपर्णेयः ।। गंगाया अपत्यं गांगेयः ।। स्त्रीभ्यो
ढगिति ढकू ।। एरकू यथा ।। चटकाया अपत्यं चा
२६ टकेरः ।। चटकाया [illegible] ऐरगिति ऐरकू ।। ढकू यथा ।। २६
गोधाया अपत्यं गौधेरः ।। गोधा [illegible] यो ढ्रगिति
रकू ।। लौपोग्नो वैलिति यैकार लोपः ।। आरकू यथा ।।
गोधाया अपत्यं गौधारः ।। आरद्विवाइति आ
रकू ।। घो यथा ।। क्षत्रस्य अपत्यं क्षत्रियः ।। रघ ।।
गु२

क्षत्राद्घ इति घः ॥ खो यथा ॥ कुलस्यापत्यं कु
लीनः ॥ कुलात्ख इति खः ॥ आयनेयीनीयि
यः फढखछघादीनामिति नादेशः ॥ एयः
यथा ॥ कुरोरपत्यं कौरव्यः ॥ कुर्वादिभ्यो ण्य इ
ति ण्यः ॥ यत् यथा ॥ मूर्द्धि भवो मूर्द्धन्यः ॥ उ
रसि भवः उरस्यः ॥ तेदं भवः दंत्यः ॥ शरीरा
वयवाच्चेति यत् ॥ इत यथा ॥ कल्याणो ग
न्धो यस्य सः सुगन्धिः ॥ उद्गतः गंधो यस्य सः
उद्गंधिः सुरभिगंधो यस्य सः सुरभिगंधिः ॥

२६

२७॥

गंधस्यदुस तिसुसुरभिभ्य इति प्रत्ययः॥ कु
मुदस्येव गंधो यस्य सः कुमुदगंधिः॥ कुरि
ष्यस्येव गंधो यस्य सः कुरिषगंधिः॥ सप्तम्यु
पमानपूर्वस्य बहुव्रीहिर्वाच्योत्तरपदश्चौत्
समासः॥ उत्तरपदलोपश्च॥ उपमानाच्चेति ॥२७॥
तेः समासांतः॥ एतच्चू यथा॥ कुसुमानिरपस्य
संजातो निसः कुसुमितो वृक्षः॥ तदस्य संजा
तं तारकादिभ्य इति जीनितिचु॥ अनडुः यथा॥
कुंडप्रमाणा॥ मिवऊधो यस्या सा कुंडोघ्नी॥

घटप्रमाणमिव ऊधो यस्याः सा ॥ घसेष्णि ॥ ऊ
धसोनङ्: स्यैनङ्: सकारस्यादेशः ॥ प्रत्ययसं
ज्ञा च बहुव्रीहेरूधसो ङीः षित्ति ङीष ॥ कुसुम
मेव धनुर्यस्य स कुसुमधन्वा ॥ धनुषश्चेयु ने
ङ् सकारस्य समासांतः ॥ चणपुयप्या ॥ दर्पे
ण वित्तो दर्पचणः ॥ केशेन वित्तः केशचणः ॥
चेचुपूयणा ॥ षष्ठेण वित्तः षष्ठचंतचुः ॥ तेने
वित्तः श्चं चुंचुपूचणपो इति चंचुपू ॥ चण
पो भवति ॥ चुंचुप् इति संज्ञानं भवति तस्यां नि

ष्ठनू यथा सर्वस्मे पटवः ॥ अयमेषामतिशा
यनपटुः पटिष्ठः ॥ अतिशायने तमबिष्ठनौ वि
नतीष्ठन् ॥ तुरि[illegible]ष्ठेमेयस्वि टिटेर्लोपः सर्वेषा
मितिशायेन प्रियः प्रेष्ठः ॥ सर्वेषामिशायेन[illegible]
[illegible]रतःस्थेतष्ठः ॥ सर्वेषामितिशायेन ब[illegible]
बहिष्ठः ॥ सर्वेषामितिशायेन गुरुः गरिष्ठः ॥
सर्वेषामितिशायेन वृद्धः । वर्षिष्ठः ॥ सर्वेषा
मितिशायेन तृसः त्रपिष्ठः ॥ सर्वेषामि
तिशायेन दीघेः द्राघिष्ठः ॥ सर्वेषामितिशा

त्रै

येनवद्रायक:।।व्रा द्रिष:।।प्रियस्थिरस्फिरोरु
बहुलगुरुवृद्धतृप्रादीर्घवृंदारकाणां प्रस्थस्फ
वर्बंहिगर्वर्षित्रप्द्राघिवृंदा:।।प्रकृत्यैकाच् इति प्र
कृतिभाव:।।सर्वेषामिति ग्रामे न स्थूल: स्थवि
ष्ठ:।।सर्वेषामिति ग्रामे न दूर: दविष्ठ:।।सर्वे
षामिति ग्रामे न युवा यविष्ठ:।।सर्वेषामिति ग्रा
येन ह्रस्व: ह्रसिष्ठ:।।सर्वेषामिति ग्रायेन क्षुद्र:।।
क्षोदिष्ठ:।।स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रा
णाम यणादिपरं पूर्वस्य च गुण:।।राम

सर्वेषामितिशायेनबहुः भूयिष्ठः॥ बहोर्लो
पो भू च बहोरिति बहोः सुतरस्य प्रत्ययस्य
इकौ लोपः॥ बहुशब्दस्य भू आदेशः॥ इष्ठ
॥२९॥ स्य यिडिति यिडागमः॥ सर्वेषामितिशायेन
वृद्धः ज्येष्ठः॥ ष्ठ चेत्यनुवर्तमाने वृद्धस्य ॥२९॥
चेतिज्यादेशः॥ सर्वेषामितिशायेन प्र
शस्यः॥ श्रेष्ठः॥ प्रशस्यस्य श्र इति आदे
शः॥ सर्वेषामितिशायेन लघुः लघिष्ठ

सर्वेषामितिज्ञायेन मृदुः म्रदिष्ठः ।। सर्वेषामितिज्ञायेन
कृशः इति क्रशिष्ठः ।। सर्वेषामितिज्ञायेन पृथुः इति प्रथि
ष्ठः ।। ऋतो हलादेर्लघोरिति ऋकारस्य र आदेशः ।
सुरिष्ठेमेयस्स्विति वर्तमाने रि ति टिलोपः ।। सर्वेषामि
तिज्ञायेन अन्तिकः ।। इति नेदिष्ठः ।। सर्वेषामितिज्ञायेन
बाढः ।। साधिष्ठः ।। अन्तिकबाढयोर्नेदसाधावादेशौ
भवतः ।। सर्वेषामितिज्ञायेन तनुः तनिष्ठः ।। सर्वेषामि
तिज्ञायेन [illegible] अणिष्ठः ।। सर्वेषामितिज्ञायेन श्वेतः श्वे
तिष्ठः ।। सर्वेषामितिज्ञायेन श्यामः श्यामिष्ठः ।। सर्वेषा
मितिज्ञायेन हरितः हरिष्ठः ।। सर्वेषामितिज्ञायेन पिञ्ज
रः पिञ्जरिष्ठः ।। ईयसुनु यथा ।। द्वाविमौ पटौ अयमनयो

रितिशयेन पटुः पटीयान्॥ अयमनयोरितिशयेन स्थूलः॥
स्थवीयान्॥ अयमनयोरितिशयेन युवा इति यवीयान्॥
अयमनयोरितितिशयेन कनिष्ठः कनीयान्॥ युवाल्प
योः कन्यतरस्यामिति कनादेशः॥ अयमनयोरितिशयेन ह्रस्वः॥
न
॥३०॥ ह्रसीयान्॥ अयमनयोरितिशयेन क्षिप्रः॥ क्षेपीयान्॥
एवं क्षुद्रः क्षोदीयान्॥ स्फिरः स्फेयान्॥ प्रियः प्रेयान्॥ व ॥३०॥
रः वरीयान्॥ गुरुः गरीयान्॥ लघुः लघीयान्॥ तृप्रः
त्रपीयान्॥ दीर्घः द्राघीयान्॥ वृंदारकः वृंदीयान्॥
महान्॥ महीयान्॥ साधुः साधीयान्॥ कृशः क्रशीयान्॥
[illegible] छियान्॥ मृदुः म्रदीयान्॥ दृढः द्रढीयान्॥ बर्ल्कः
बा।कीयान्॥ ज्येष्ठः ज्यायान्॥ [illegible]पादादीपसईतिष्ठा

लुतरस्यईयसुनिकारस्य आन्चेपसवति ।। अल्प: आल्पियानु ।।
श्याम: श्यामीयानु ।। पिंजर: पिंजरियानु ।। द्विवचनविभज्य
ज्यो [illegible]पपादेतरबीयसुनौरतिदेर सप्रूप्ययेनौ ।। तरपुयथा ।।
अयमनयोरतिशायेन कुमारकुमारतर: ।। पवपटु: ।।
दु५ पटुतर: ।। मृदु: मृतर: ।। कृश: कृशतर: ।। लघु: लघुतर: ।। चु५
द्विवचनविज्योपपदे तरबीयसुनावितितरपु ।। सर्वेषामति
शायेनप्रति ।। पयस्तितरा द्वयोरतिशायेन जल्मतिजल्म
तरा ।। तिङ: श्वेतितरपु ।। विमेस्ति: चैपै[illegible]दाम्बवी ।। पा
यत्रवर्षेइतिस्यय: ।। तमपुयथा ।। सर्वासामतिशाये
